# त्रयोदश:पाठः -13

## वृक्षारोपणस्य महत्वम्

अधुना विज्ञानस्य युग: अस्ति । द्विचक्रचतुश्चक्रादि वाहनानि, अनेका: यन्त्रशाला: प्रयोगशाला: च विषमिव धूमादिकं उद्वमन्ति। अनेन अस्माकं वातावरणं नितान्तं दूषितं भवति । एतेन अस्माकं भूमण्डलस्य हानि:भवति ।



एतस्मिन् विषमे अवसरे वृक्षा: एव अस्माकं शरणं भवन्ति। वृक्षा: अस्मभ्यं प्राणवायुं यच्छन्ति । अनादिकालात् आरभ्य मानवजीवने वृक्षाणां महत्वं वर्णितं वर्तते । अस्माकं ग्रन्थेषु वृक्षारोपण - महोत्सवानां वर्णनं कृतं अस्ति ।



वृक्षा: न केवलं प्राणवायुं , अपि च पत्रं, शाकं, फलानि अन्यानि गृहोपयोगीनि वस्तूनि, काष्ठानि च यच्छन्ति। अस्माकं राजकीयनेतार: तत्र तत्र वृक्षाणां आरोपणाय तस्य पालनाय च प्रयत्नं कुर्वन्ति। अत: वृक्षाणां सदुपयोगं ज्ञात्वा अस्माभि: अपि यावच्छक्यं तेषां आरोपणं कर्तव्यम् । ते वृक्षा: ससुखं परित्यज्य परोपकारमेव कुर्वन्ति। अत एवोक्तम् –

छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे ।
फलान्यपि परार्थाय वृक्षा: सत्पुरुषा इव ।।

## I. Meaning:

१. प्राणवायु: २. ग्रन्थ: ३. महोत्सव: ४. प्रतिदिनम् ५. नेतार:

## II. Opposite:

१. विषम्  २. हानि:  ३. उपयोग:  ४. सत्पुरुष:  ५. छाया

## III. Split:

१. विषमिव  २. गृहोपयोगीनि  ३. सदुपयोग

४. यावच्छक्यं  ५. परोपकारमेव  ६. एवोक्तम्

## IV. Choose:

१. अधुना ____ युग: अस्ति । यन्त्राणाम् / मन्त्राणाम्)

२. यन्त्राणां चालनेन ____ भवति । (हानि:/लाभ:)

३. अस्मिन् विषमे अवसरे ____ शरणम् । (पक्षा:/वृक्षा:)

४. अस्माभि: वृक्षाणां ____ कर्तव्यम् ।( आरोपणम् /छेदनम् )

५. वृक्षा: ____ यच्छन्ति । (प्राणवायुं/अपानवायुं)

## V. Answer the following:

१. अधुना कस्य युग: अस्ति ?

२. वाहनानि कं उद्गमन्ति ?

३. विषमे अवसरे अस्माकं के शरणं भवन्ति ?

४. वृक्षा: कानि यच्छन्ति ?

५. अस्माकं राजकीयनेतार: किं कुर्वन्ति ?

६. वृक्षाणां महत्वं किम् ?

# चतुर्दशः पाठः- 14

## क्रियापदानि

### लृट् - भविष्यत्कालः

(कृ)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | करिष्यति | करिष्यतः | करिष्यन्ति |
| मध्यमपुरुषः | करिष्यसि | करिष्यथः | करिष्यथ |
| उत्तमपुरुषः | करिष्यामि | करिष्यावः | करिष्यामः |

(अस्)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भविष्यति | भविष्यतः | भविष्यन्ति |
| मध्यमपुरुषः | भविष्यसि | भविष्यथः | भविष्यथ |
| उत्तमपुरुषः | भविष्यामि | भविष्यावः | भविष्यामः |

(पा)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पास्यति | पास्यतः | पास्यन्ति |